अथ श्रीराधाप्रकरणम्

तत्रापि सर्वथा श्रेष्ठे राधाचन्द्रावलीत्युभे ।
यूथयोस्तु ययोः सन्ति कोटिसङ्ख्या मृगीदृशः ॥ १ ॥

अभूदाकुलितो रासः प्रमदाशतकोटिभिः ।
पुलिने यामुने तस्मिन्नित्येषागमिकी प्रथा ॥ २ ॥

तयोरप्युभयोर्मध्ये राधिका सर्वथाधिका ।
महाभावस्वरूपेयं गुणैरतिवरीयसी ॥ ३ ॥

गोपालोत्तरतापन्यां यद्गान्धर्वेति विश्रुता ।
राधेत्यृक्परिशिष्टे च माधवेन सहोदिता ।
अतस्तदीयमाहात्म्यं पाद्मे देवर्षिणोदितम् ॥ ४ ॥

तथा हि

यथा राधा प्रिया विष्णोस्तस्याः कुण्डं प्रियं तथा ।
सर्वगोपीषु सैवैका विष्णोरत्यन्तवल्लभा ॥ ५ ॥

ह्लादिनी या महाशक्तिः सर्वशक्तिवरीयसी ।
तत्सारभावरूपेयमिति तन्त्रे प्रतिष्ठिता ॥ ६ ॥

सुष्ठुकान्तस्वरूपेयं सर्वदा वार्षभानवी ।
धृतषोडशशृङ्गारा द्वादशाभरणान्विता ॥ ७ ॥

तत्र सुष्ठुकान्तस्वरूपा यथा श्रीकृष्णवाक्यम्

कचास्तव सुकुञ्चिता मुखमधीरदीर्घेक्षणं
कठोरकुचभागुरः क्रशिमशालि मध्यस्थलम् ।
नते शिरसि दोर्लते करजरत्नरम्यौ करौ
विधूनयति राधिके त्रिजगदेष रूपोत्सवः ॥ ८ ॥

अथ धृतषोडशशृङ्गारा

स्नाता नासाग्रजाग्रन्मणिरसितपटा सूत्रिणी बद्धवेणी
सोत्तंसा चर्चिताङ्गी कुसुमितचिकुरा स्रग्विणी पद्महस्ता ।

ताम्बूलास्योरुबिन्दुस्तवकितचिबुका कज्जलाक्षी सुचित्रा
राधालक्तोज्ज्वलाङ्घ्रिः स्फुरिति तिलकिनी षोडशाकल्पिनीयम् ॥ ९ ॥

अथ द्वादशाभरणाश्रिता

दिव्यश्चूडामणीन्द्रः पुरटविरचिताः कुण्डलद्वन्द्वकाञ्चि-
निष्काश्चक्रीशलाकायुगवलयघटाः कण्ठभूषोर्मिकाश्च ।
हारास्तारानुकारा भुजकटकतुलाकोटयो रत्नक्ऌप्ता-
स्तुङ्गा पादाङ्गुरीयच्छविरिति रविभिर्भूषणैर्भाति राधा ॥ १० ॥ ।

अथ वृन्दावनेश्वर्याः कीर्त्यन्ते प्रवरा गुणाः ।
मधुरेयं नववयाश्चलापाङ्गोज्ज्वलस्मिता ॥ ११ ॥

चारुसौभाग्यरेखाढ्या गन्धोन्मादितमाधवा ।
सङ्गीतप्रसराभिज्ञा रम्यवाङ्नर्मपण्डिता ॥ १२ ॥

विनीता करुणापूर्णा विदग्धा पाटवान्विता ।
लज्जाशीला सुमर्यादा धैर्यगाम्भीर्यशालिनी ॥ १३ ॥

सुविलासा महाभावपरमोत्कर्षतर्षिणी ।
गोकुलप्रेमवसतिर्जगच्छ्रेणीलसद्यशाः ॥ १४ ॥

गुर्वर्पितगुरुस्नेहा सखीप्रणयितावशा ।
कृष्णप्रियावलीमुख्या सन्तताश्रवकेशवा ।
बहुना किं गुणास्तस्याः सङ्ख्यातीता हरेरिव ॥ १५ ॥

इत्यङ्गोक्तिमनःस्थास्ते परसम्बन्धगास्तथा ।
गुणा वृन्दावनेश्वर्या इह प्रोक्ताश्चतुर्विधाः ॥ १६ ॥

माधुर्यं चारुता नव्यं वयः कैशोरमध्यमम् ।
सौभाग्यरेखा पादादिस्थिताश्चन्द्रकलादयः ॥ १७ ॥

साधुमार्गादचलनं मर्यादेत्युदितं बुधैः ।
लज्जाभिजात्यशीलाद्यैर्धैर्यं दुःखसहिष्णुता ॥ १८ ॥

व्यक्तत्वाल्लक्षितत्वाच्च नान्येषां लक्षणं कृतम् ॥ १९ ॥

तत्र मधुरा यथा विदग्धमाधवे (1.32)

बलादक्ष्णोर्लक्ष्मीः कवलयति नव्यं कुवलयं
मुखोल्लासः फुल्लं कमलवनमुल्लङ्घयति च ।
दशां कष्टामष्टापदमपि नयत्याङ्गिकरुचि-
र्विचित्रं राधायाः किमपि किल रूपं विलसति ॥ २० ॥

अथ नववयाः

श्रोणिः स्यन्दनतां कृशोदरि कुचद्वन्द्वं क्रमाच्चक्रतां
भ्रूश्चापश्रियमीक्षणद्वयमिदं यात्याशुगत्वं तव ।
सैनापत्यमतः प्रदाय भुवि ते कामः पशूनां पतिं
धुन्वञ्जित्वरमानिनं त्वयि निजं साम्राज्यभारं न्यधात् ॥ २१ ॥

अथ चलापाङ्गी

तडिदतिचलतां ते किं दृगन्तादपाठी-
द्विधुमखि तडितो वा किं तवायं दृगन्तः ।
ध्रुवमिह गुरुताभूत्त्वद्दृगन्तस्य राधे
वरमतिजविनां मे येन जिग्ये मनोऽपि ॥ २२ ॥

अथ उज्ज्वलस्मिता

तव वदनविधौ विधौतमध्यां
स्मितसुधयाधरलेखिकामुदीक्ष्य ।
सखि लघुरघभिच्चकोरवर्यः
प्रमदमदोद्धुरबुद्धिरुज्जिहीते ॥ २३ ॥

अथ चारुसौभाग्यरेखाढ्या

अघहर भज तुष्टिं पश्य यच्चन्द्रलेखा-
वलयकुसुमवल्लीकुण्डलाकारभाग्भिः ।
अभिदधति निलीनामत्र सौभाग्यरेखा-
विततिभिरनुविद्धाः सुष्ठु राधां पदाङ्काः ॥ २४ ॥

अथ गन्धोन्मादितमाधवा

वल्लीमण्डलपल्लवालिभिरितः सङ्गोपनायात्मनो
मा वृन्दावनचक्रवर्तिनि कृथा यत्नं मुधा माधवि ।
भ्राम्यद्भिः स्वविरोधिभिः परिमलैरुन्मादनैः सूचितां
कृष्णस्तां भ्रमाधिपः सखि धुवन्धूर्तो ध्रुवं धास्यति ॥ २५ ॥

अथ सङ्गीतप्रसराभिज्ञा

कृष्णसारहरपञ्चमस्वरे मुञ्च गीतकुतुकानि राधिके ।
प्रेक्षतेऽत्र हरिणानुधावितां त्वां न यावदतिरोषणः पतिः ॥ २६ ॥

अथ रम्यवाक्

सुवदने वदने तव रधिके स्फुरति केयमिहाक्षरमाधुरी ।
विकलतां लभते किल कोकिलः सखि ययाद्य सुधापि मुधार्थताम् ॥ २७ ॥

अथ नर्मपण्डिता

वंश्यास्त्वमुपाध्यायः किमुपाध्यायी तवात्र वंशी वा ।
कुलयुवतिधर्महरणादस्ति युयोर्नापरं कर्म ॥ २८ ॥

यथा वा

देव प्रसीद वृषवर्धन पुण्यकीर्ते
साध्वीगणस्तनशिवार्चननित्यपूत ।
निर्मञ्छनं तव भजे रविपूजनाय
स्नातास्मि हन्त मम न स्पृश न स्पृशाङ्गम् ॥ २९ ॥

अथ विनीता

अपि गोकुले प्रसिद्धा भ्रूभ्रमिभिः परिजनैर्निषिद्धापि ।
पीठं मुमोच राधा भद्रिकामपि दूरतः प्रेक्ष्य ॥ ३० ॥

यथा वा विदग्धमाधवे (5.15)

भूयो भूयः कलिविलसितैः सापराधापि राधा
श्लाघ्येनाहं यदघरिपुणा बाढमङ्गीकृतास्मि ।
तत्र क्षामोदरि किमपरं कारणं वः सखीनां
दत्तामोदां प्रगुणकरुणामञ्जरीमन्तरेण ॥ ३१ ॥

अथ करुणापूर्णा

तार्णशुचिशिखयापि तर्णकं
विद्धवक्रमवलोक्य सास्रया ।
लिप्यते क्षतमवाप्तबाधया
कुङ्कुमेन कृपयास्य राधया ॥ ३२ ॥

अथ विदग्धा

आचार्या धातुचित्रे पचनविरचनाचातुरीचारुचित्ता
वाग्युद्धे मुग्धयन्ती गुरुमपि च गिरां पण्डिता माल्यगुम्फे ।
पाठे शारीशुकानां पटुरजितमपि द्यूतकेलिषु जिष्णु-
र्विद्याविद्योतिबुद्धिः स्फुरति रतिकलाशालिनी राधिकेयम् ॥ ३३ ॥

अथ पाटवान्विता यथा विदग्धमाधवे (3.3)

छिन्नः प्रियो मणिसरः सखि मौक्तिकानि
वृत्तान्यहं विचिनुयामिति कैतवेन ।
मुग्धं विवृत्य मयि हन्त दृगन्तभङ्गीं
राधा गुरोरपि पुरः प्रणयाद्यतानीत् ॥ ३४ ॥

अथ लज्जाशीला

व्रजनरपतिसूनुर्दुर्लभालोकनोऽयं
स्फुरति रहसि ताम्यत्येष तर्षाज्जनोऽपि ।
विरम जननि लज्जे किञ्चिदुद्घाट्य वक्त्रं
निमिषमिह मनागप्यक्षिकोणं क्षिपामि ॥ ३५ ॥

अथ सुमर्यादा

प्राणानकृताहारा सखि राधाचातकी वरं त्यजति ।

न तु कृष्णमुदिरमुक्तादमृताद्वृत्तिं भजेदपराम् ॥ ३६ ॥

यथा वा

आहूयमाना व्रजनाथयास्मि युक्तोऽभिसारः सखि नाधुना मे ।
न तादृशीनां हि गुरूत्तमानामाज्ञास्ववज्ञा वलते शिवाय ॥ ३७ ॥

यथा वा

पूर्णाशीः पूर्णिमासावनवहिततया या त्वयास्यै वितीर्णा
वष्टि त्वामेव तन्वन्नखिलमधुरिमोत्सेकमस्यां मुकुन्दः ।
दिष्ट्या पर्वोदगात्ते स्वयमभिसरणे चित्तमाधत्स्व वत्से
युक्त्याप्युक्ता मयेति द्युमणिसखसुता प्राहिणोदेव चित्राम् ॥ ३८ ॥

अथ धैर्यशालिनी

तीव्रस्तर्जति भिन्नधीर्गृहपतिश्छद्मज्ञया पद्मया
हारं हारयति हरिप्रणिहितं कीशेन भर्तुः स्वसा ।
मल्लीं लुम्पति कृष्णकाम्यकुसुमां शैब्या प्रिया वर्करी
राधा पश्य तथाप्यतीव सहना तुष्णीमसौ तिष्ठति ॥ ३९ ॥

अथ गाम्भीर्यशालिनी

कलहान्तरितापदे स्थितिं सखि धीराद्य गतापि राधिका
बहिरुद्भटमानलक्षणा सुदुरूहा ललिताधियाप्यभूत् ॥ ४० ॥

अथ सुविलासा

तिर्यक्क्षिप्तचलद्दृगञ्चलरुचिर्लास्योल्लसद्भ्रूलता
कुन्दाभस्मितचन्द्रिकोज्ज्वलमुखी गण्डोच्छलत्कुण्डला ।
कन्दर्पागमसिद्धमन्त्रगहनामर्धं दुहाना गिरं
हारिण्यद्य हरेर्जहार हृदयं राधा विलासोर्मिभिः ॥ ४१ ॥

अथ महाभावपरमोत्कर्षतर्षिणी

अश्रूणामतिवृष्टिभिर्द्विगुणयन्त्यर्कात्मजानिर्झरं

ज्योत्स्नीस्यन्दिविधूपलप्रतिकृतिच्छायं वपुर्बिभ्रती ।
कण्ठान्तस्त्रुटदक्षराद्यपुलकैर्लब्धा कदम्बाकृतिं
राधा वेणुधर प्रवातकदलीतुल्या क्वचिद्वर्तते ॥ ४२ ॥

अथ गोकुलप्रेमवसतिः

प्रेमसन्ततिभिरेव निर्ममे वेधसा नु वृषभानुनन्दिनी ।
यादृशां पदमिता मनांसि नः स्नेहयत्यखिलगोष्ठवासिनाम् ॥ ४३ ॥

अथ जगच्छ्रेणीलसद्यशाः

उत्फुल्लं किल कुर्वती कुवलयं देवेन्द्रपत्नीश्रुतौ
कुन्दं निक्षिपती विरिञ्चीगृहिणीरोमौषधीहर्षिणी ।
कर्णोत्तंससुधांशुरत्नसकलं विद्राव्य भद्राङ्गि ते
लक्ष्मीमप्यधुना चकार चकितां राधे यशःकौमुदी ॥ ४४ ॥

अथ गुर्वर्पितगुरुस्नेहा

न सुतासि कीर्तिदायाः किन्तु ममैवेति तथ्यमाख्यामि ।
प्राणिमि वीक्ष्य मुखन्ते कृष्णस्येवेति किं त्रपसे ॥ ४५ ॥

अथ सखीप्रणयाधीना

उपदिश सखि वृन्दे वल्लवेन्द्रस्य सूनुं
किमयमिह सखीनां मामधीनां दुनोति ।
अपसरतु सशङ्कं मन्दिरान्मानिनीनां
कलयति ललितायाः किं न शौटीर्यधाटीम् ॥ ४६ ॥

अथ कृष्णप्रियावलीमुख्या यथा ललितमाधवे (10.10)

सन्तु भ्राम्यदपाङ्गभङ्गिखुरलीखेलाभुवः सुभ्रुवः
स्वस्ति स्यान्मदिरेक्षणे क्षणमपि त्वामन्तरा मे कुतः ।
ताराणां निकुरम्बकेण वृतया श्लिष्टेऽपि सोमाभया
नाकाशे वृषभानुजां श्रियमृते निष्पद्यते स्वच्छता ॥ ४७ ॥

अथ सन्तताश्रवकेशवा

षडङ्घ्रिभिरमर्दितान्कुसुमसञ्चयानाचिनोद्
अखण्डमपि राधिके बहुशिखण्डकं त्वद्गिरा ।
अमुं च नवपल्लवव्रजमुदञ्चदर्कोज्ज्वलं
करोतु वशगो जनः किमयमन्यदाज्ञापय ॥ ४८ ॥

यस्याः सर्वोत्तमे यूथे सर्वसद्गुणमण्डिताः ।
समन्तान्माधवाकर्षिविभ्रमाः सन्त

तास्तु वृन्दावनेश्वर्याः सख्यः पञ्चविधा मताः ।
सख्यश्च नित्यसख्यश्च प्राणसख्यश्च काश्चन ।
प्रियसख्यश्च परमप्रेष्ठसख्यश्च विश्रुताः ॥ ५० ॥

सख्यः कुसुमिकाविन्ध्याधनिष्ठाद्याः प्रकीर्तिताः ।
नित्यसख्यश्च कस्तूरीमणिमञ्जरिकादयः ॥ ५१ ॥

प्राणसख्यः शशिमुखीवासन्तीलासिकादयः ।
गता वृन्दावनेश्वर्याः प्रायेणेमाः स्वरूपताम् ॥ ५२ ॥

प्रियसख्यः कुरङ्गाक्षी सुमध्या मदनालसा ।
कमला माधुरी मञ्जुकेशी कन्दर्पसुन्दरी ।
माधवी मालती कामलता शशिकलादयः ॥ ५३ ॥

परमप्रेष्ठसख्यस्तु ललिता सविशाखिका ।
सचित्रा चम्पकलता तुङ्गविद्येन्दुलेखिका ।
रङ्गदेवी सुदेवी चेत्यष्टौ सर्वगणाग्रिमाः ॥ ५४ ॥

आसां सुष्ठु द्वयोरेव प्रेम्णः परमकाष्ठया ।
क्वचिज्जातु क्वचिज्जातु तदाधिक्यमिवेक्षते ॥ ५५ ॥

इति श्रीश्रीज्ज्वलनीलमणौ श्रीराधाप्रकरणम् ॥ ४ ॥